# Medhavikritam Mrityunjaya Stotram

# મેધાવીકૃતં મૃત્યુઞ્જયસ્તોત્રમ્

## Document Information

Text title : Medhavikritam Mrityunjaya Stotram

File name : mRRityunjayastotrammedhAvIkRRitaM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 16 | 181.2-199||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# મેધાવીકૃતં મૃત્યુઞ્જયસ્તોત્રમ્

મેધાવી ઉવાચ -

ૐ નમઃ શમ્ભવે નિત્યં મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૮૧।૨॥

ૐ નમઃ પાર્વતીનાથ શરણાગતવત્સલ ।
ૐ નમો વિશ્વરૂપાય ૐ નમોઽનન્તમૂર્તયે ॥ ૧૮૨॥

ૐ નમો રૂપહીનાય નાનારૂપાય તે નમઃ ।
ૐ નમો નિષ્કલેશાય ૐ નમો નિર્ગુણાય તે ॥ ૧૮૩॥

ૐ નમો નિર્વિકારાય શાન્તાકારાય તે નમઃ ।
ૐ નમો નિષ્પ્રપઞ્ચાય નમઃ શ્રુત્યાત્મકાય તે ॥ ૧૮૪॥

ૐ નમઃ કાલરૂપાય કાલાતીતાય તે નમઃ ।
ૐ નમઃ શ્રીમહેશાય સર્વાધારાય તે નમઃ ॥ ૧૮૫॥

ૐ નમઃ પુણ્યરૂપાય પુણ્યાતીતાય તે નમઃ ॥

ૐ નમો ભૂસ્વરૂપાય ૐ નમોઽમ્બુસ્વરૂપિણે ॥ ૧૮૬॥

ૐ નમોઽગ્નિસ્વરૂપાયઃ ૐ નમો વાયુમૂર્તયે ।
ૐ નમોઃ વ્યોમરૂપાય દિવ્યરૂપાય તે નમઃ ॥ ૧૮૭॥

ૐ નમઃ કાલરૂપાય યજ્વરૂપાય તે નમઃ ।
ૐ નમો આનુરૂપાય ચન્દ્રરૂપાય તે નમઃ ॥ ૧૮૮॥

ૐ નમઃ સર્વરૂપાય શરણ્યાય નમો નમઃ ॥ ૧૮૯॥

(નમસ્તે રુદ્ર મન્યવ ઉતોત ઇષવે નમઃ ।
ઇત્યાદિ ત વો જમ્ભે દધામીતિ પર્યન્ત નમકં પઠિત્વા પુનઃ સ્તોત્રમ્)
પ્રણતોઽસ્મિ મહાદેવ પ્રપન્નોઽસ્મિ સદાશિવ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૦॥

કાલકૂટધર શ્રીમન્કાલકાલ કૃપાનિધે ।

નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૧॥

ચન્દ્રશેખર વિશ્વાત્મન્કરુણાકર શઙ્કર ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૨॥

ઋગ્યજુઃસામરૂપેશ ત્રિલોચન સુરોત્તમ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૩॥

અનન્તામેયકલ્યાણ કલ્યાણગુણસંશ્રય ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૪॥

સુરેશ્વર સુરારાધ્ય નિર્દગ્ધત્રિપુરાસુર ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૫॥

પાશાઙ્કુશધર શ્રીમન્નમો ડમરુભૂષણ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૬॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગ હર નિર્ધૂતકલ્મષ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૭॥

પ્રદર્શય મહાશૂલં કલ્પક્ષયકરં હર ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૮॥

ભુજઙ્ગભૂષણ શ્રીમન્વૃષભધ્વજ વિશ્વગ ।
નિવારય મહામૃત્યું મૃત્યુઞ્જય નમોઽસ્તુ તે ॥ ૧૯૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે મેધાવીકૃતં મૃત્યુઞ્જયસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૬ । ૧૮૧।૨-૧૯૯॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 16 . 181.2-199 ..

Encoded and proofread by Ruma Dewan

*Medhavikritam Mrityunjaya Stotram*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*